## अश्वाघस्यात् । (३७/३५९०)

अश्व अघ इत्येतयोः क्यचि [1]परतः छन्दसि विषये आकारादेशो भवति । 'अश्वायन्तो [2]मघवन्' (ऋ. ७.३२.२३) । 'मा त्वा वृका अघायवो विदन्' (काठ. २.७.३९) । एतदेव आत्ववचनं ज्ञापकं 'न च्छन्दस्यपुत्रस्य' (७.४.३५/३५८८) इति [3]दीर्घप्रतिषेधो भवति इति ॥

## देवसुम्नयोर्यजुषि काठके । (३८/३५९१)

देव सुम्न इत्येतयोः क्यचि परतः आकारादेशो भवति काठके यजुषि । '[4]देवायते यजमानाय' (काठ. २.९) । '[5]सुम्नायन्तो हवामहे' (काठ. ८.१७.७६) । यजुषि इति किम् ? 'देवाञ् जिगाति सुम्नयुः' (ऋ. ३.२७.१) । काठके इति किम् ? '[6]सुम्नयुरिदमसीदमसि' (तै. २.५.७.४)॥

## कव्यध्वरपृतनस्यर्चि लोपः । (३९/३५९२)

कवि अध्वर पृतना इत्येतेषामङ्गानां क्यचि परतो लोपो भवति [7]ऋचि विषये । कव्यन्तः सुमनसः । अध्वर – 'अध्वर्यन्तः[8]' (तै. ४.६.३.३) । पृतना – [9]पृतन्यन्तः (पै. २.८९.४) तिष्ठन्ति ॥

## द्यतिस्यतिमास्थामित्ति किति । (४०/३०७४)

द्यति स्यति मा स्था इत्येतेषामङ्गानाम् इकारादेशो भवति तकारादौ किति प्रत्यये परतः । द्यति – निर्दितः । निर्दितवान् । स्यति – अवसितः । अवसितवान् । मा – मितः । मितवान् । स्था – स्थितः । स्थितवान् । ति इति किम् ? अवदाय । किति इति किम् ? अवदाता ॥

## शाछोरन्यतरस्याम् । (४१/३०७८)

शा छा इत्येतयोः अन्यतरस्याम् इकारादेशो भवति तकारादौ किति । शा – निशितम्, निशातम् । निशितवान्, निशातवान् । छा – अवच्छितम्, अवच्छातम् । अवच्छितवान्, अवच्छातवान् ।

[८७३] श्यतेरित्त्वं व्रते नित्यमिति वक्तव्यम् । (म. भा. ३.३५०)

संशितो ब्राह्मणः । संशितव्रतः इत्यर्थः । व्यवस्थितविभाषाविज्ञानात् सिद्धम् ।

देवत्रातो गलो ग्राह इति योगे च सद्विधिः ।
मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ॥ (म. भा. ३.३५०)

---

1. च इत्यधिकम् क. 2. मघवान् इ, इन्द्रवाजिनः ह. 3. द्वयोरपीकारदीर्घयोः प्रतिषेधोऽपि भवति क. ड. 4. देवायन्तो मुद्रितः पाठः ड. 5. सुम्नायते इ. 6. सुम्नयोः इ. ड. 7. ऋग्विषये ई. 8. स्पष्टुः इत्यधिकम् क, तस्थुः इत्यधिकम् ह. 9. पृतन्यवः ब.